# सम्बोधनपदौचित्यम्

## (श्रीमद्भगवद्गीतायाः एकादशाध्यायस्य सन्दर्भे)

**आचार्यः अनूप शर्मा**
वरिष्ठशोधाध्येता, सं.सं.प्र.
anoopsharma047@gmail.com

### सारांशः

*वाक्ये सम्बोधनपदस्य किञ्चित् विशिष्टम् एव महत्त्वम्। एकस्मिन् पक्षे इदं प्रयोक्तुः मनोदशां ज्ञापयति अन्यस्मिन् च पक्षे बोधयति यत् कस्याम् अवस्थायां कीदृशं सम्बोधनं प्रयुक्तम् अथवा प्रयोक्तव्यम् । श्रीमद्भगवद्गीतायाः एकादशः अध्यायः अस्य तत्त्वस्य एव प्रामाणिकतां प्रमाणयति । 'कमलपत्राक्ष' इति सम्बोधनपदम् अस्ति । कमलस्य पत्रे इव (दीर्घे रक्तान्ते परममनोरमे) अक्षिणी यस्य (तव) सः (त्वं) हे कमलपत्राक्ष, अत्र अर्जुनः प्रेमातिशयात् अतिसौन्दर्यकारणात् च भगवतः श्रीकृष्णस्य कृते एतस्य सम्बोधनस्य प्रयोगं करोति । सप्तमे अध्याये भगवता उक्तम् आसीत् प्रभवः प्रलयः च अहमेव अस्मि । सात्त्विकादिभावाः मत्तः एव उत्पन्नाः । जगतः आदिमध्यान्तेषु अहमेव अस्मि । एतादृशः श्रीकृष्णः तिसृषु स्थितिषु त्रिषु अपि गुणेषु स्थित्वा अपि तैः लिप्तः न भवति । जले स्थित्वा अपि निर्लिप्तत्वं कमलपत्रस्य गुणः अस्ति । अतः तादृशः भवान् अस्ति इति मत्वा अर्जुनेन कमलपत्राक्ष इति सम्बोधनं कृतम् ।*

### प्रस्तावना

श्रीमद्भगवद्गीतायाः एकादशाध्यायः विश्वरूपसन्दर्शनयोगः इति नाम्ना ज्ञायते । अस्मिन् अध्याये अर्जुनस्य प्रार्थनया भगवतः दर्शितस्य विश्वरूपदर्शनस्य वर्णनम् अस्ति । अस्मिन् अध्याये कृष्णार्जुनयोः संवादे विभिन्नानि सम्बोधनपदानि आगतानि । एतेषां सम्बोधनपदानां किञ्चन औचित्यम् अस्ति । तत्तद् प्रसङ्गे एतानि सम्बोधनपदानि सोद्धेश्यं प्रयुक्तानि सन्ति । एतेषां सम्बोधनपदानाम् औचित्यं किम् इति पश्यामः ।

## सम्बोधनानाम् औचित्यम्

श्रीमद्भगवद्गीतायाः एकादशे अध्याये आहत्य पञ्चपञ्चाशत् श्लोकाः सन्ति । एतेषु श्लोकेषु प्रयुक्तानि सम्बोधनपदानि आहत्य पञ्चचत्वारिंशत् सन्ति । एतस्मिन् लेखे कीदृश्यां परिस्थितौ अर्जुनः अथवा भगवान् श्रीकृष्णः कीदृशानां पदानां प्रयोगं कृतवान् इति वर्णितम् अस्ति –

**भावप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।**
**त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥**[1]

एतस्मिन् श्लोके **कमलपत्राक्ष** इति सम्बोधनपदम् अस्ति । कमलस्य पत्रे इव (दीर्घे रक्तान्ते परममनोरमे) अक्षिणी यस्य (तव) सः (त्वं) हे कमलपत्राक्ष, अत्र अर्जुनः प्रेमातिशयात् अतिसौन्दर्यकारणात् च भगवतः श्रीकृष्णस्य कृते एतस्य सम्बोधनस्य प्रयोगं करोति । सप्तमे अध्याये भगवता उक्तम् आसीत् प्रभवः प्रलयः च अहमेव अस्मि । सात्त्विकादिभावाः मत्तः एव उत्पन्नाः । जगतः आदिमध्यान्तेषु अहमेव अस्मि । एतादृशः श्रीकृष्णः तिसृषु स्थितिषु त्रिषु अपि गुणेषु स्थित्वा अपि तैः लिप्तः न भवति ।

[1] ***श्रीमद्.गीता, 11.02***

जले स्थित्वा अपि निर्लिप्तत्वं कमलपत्रस्य गुणः अस्ति । अतः तादृशः भवान् अस्ति इति मत्वा अर्जुनेन कमलपत्राक्ष इति सम्बोधनं कृतम् ।

**एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।**

**द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥**[2]

एतस्मिन् श्लोके द्वे सम्बोधनपदे प्रयुक्ते स्तः, **परमेश्वर पुरुषोत्तम** च इति । परमः च असौ ईश्वरः परमेश्वरः, तत्सम्बुद्धौ हे परमेश्वर, पुरुषेषु उत्तमः पुरुषोत्तमः, तत्सम्बुद्धौ - हे पुरुषोत्तम इति । भगवान् पुरुषोत्तमः अस्ति इत्यस्य प्रतिपादनं स्वयं भगवान् श्रीकृष्णः पञ्चदशाध्यायस्य अष्टादशे श्लोके स्पष्टीकरोति ।

**यस्मात् क्षरमतीतोहमक्षरादपि चोत्तमः ।**

**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः** ॥[3] इति

अत्र परमेश्वर इति सम्बोधनम् अपि यत् प्रयुक्तम् अस्ति तत् एवमेव न, अपितु पूर्वं भगवान् स्वयम् उक्तवान् आसीत् यत् **'भूतानामीश्वरोऽपि सन्[4]'** इति । तद्वत् - **सर्वलोकमहेश्वरम्**[5] इति । अत्र अर्जुनः वक्तुम् इच्छति यत् 'समग्रस्य ऐश्वर्यस्य स्वामी भवान् एव अस्ति' इति ।

**मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।**

**योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥**[6]

एतस्मिन् अपि श्लोके सम्बोधनद्वयम् अस्ति । **प्रभो योगेश्वर** च इति । सृष्टि-स्थिति-संहार-प्रवेश-प्रशासनेषु प्रभवति इति प्रभुः, तत्सम्बुद्धौ हे प्रभो, अर्थात् अयि सर्वसमर्थ श्रीकृष्ण इति । सर्वेषाम् अणिमादिसिद्धिशालिनां योगानां योगिनाम् ईश्वरः योगेश्वरः, तत्सम्बुद्धौ हे योगेश्वर, अर्थात् अत्र अर्जुनः वक्तुम् इच्छति यत् 'भक्तियोगः ज्ञानयोगः कर्मयोगः ध्यानयोगः हठयोगः राजयोगः लययोगः मन्त्रयोगः इत्यादयः यावन्तः अपि योगाः भवितुम् अर्हन्ति तेषां सर्वेषाम् अपि स्वामी भवान् एव अस्ति । अतः तया अलौकिकशक्त्या भवान् विराड्रूपम् अपि दर्शयतु' इति ।

अधुना अग्रिमं सम्बोधनपदं पश्यामः **'पश्य मे पार्थ रूपाणि'**[7] इति एतस्मिन् श्लोकपादे भगवान् श्रीकृष्णः **पार्थ** इति सम्बोधनं करोति । पृथायाः अपत्यं पुमान् पार्थः, तत्सम्बुद्धौ हे पार्थ इति । अत्र भगवान् सम्बन्धं स्थापयन् वदति । पृथा भगवतः श्रीकृष्णस्य साक्षात् पितृष्वसा अस्ति । तस्याः पुत्रः अर्जुनः । अतः अत्र भ्रातृसम्बन्धं प्रदर्शयन् वदति अयि पार्थ ! अहं तव कृते सर्वदा अपि सज्जः अस्मि । अग्रिमे श्लोके **'पश्याश्चर्याणि भारत'**[8] इति । भगवान् श्रीकृष्णः अस्मिन् श्लोकांशे भारत इति सम्बोधनं करोति । भरतस्य गोत्रापत्यं पुमान् भारतः, तत्सम्बुद्धौ हे भारत इति । हे भरतश्रेष्ठ इति भावः । अस्मिन् श्लोके एतेन सम्बोधनेन भगवान् वंशस्मारणम् अपि करोति । न केवलं भवान् मम सम्बन्धी अपि तु श्रेष्ठकुले प्राप्तजन्मा भवान् अस्ति । अतः अदृष्टपूर्वाणि आश्चर्याणि ते दर्शयामि ।

---

[2] श्रीमद्.गीता, 11.03
[3] श्रीमद्.गीता, 15.18
[4] श्रीमद्.गीता – 04.06
[5] श्रीमद्.गीता – 05.29
[6] श्रीमद्.गीता, 11.04
[7] श्रीमद्.गीता – 11.05
[8] श्रीमद्.गीता – 11.06

अग्रिमे श्लोकपादे **'मम देहे गुडाकेश'**[9] इति । गुडाका निद्रा आलस्यम् इन्द्रियाणि वा तस्याः ईशः शास्ता जितनिद्रः जितेन्द्रियः वा इति। गुडाकायाः ईशः गुडाकेशः, तत्सम्बुद्धौ हे गुडाकेश इति । गुडाका इत्यस्य अर्थः भवति निद्रा इति । निद्रा तमोगुणस्य लक्षणम् अस्ति । यः निद्रायाः वशे भवति सः भगवतः ऐश्वररूपं द्रष्टुम् अर्हः न भवति । परन्तु अर्जुनः जितनिद्रः (गुडाकेशः) अस्ति । अतः अत्र गुडाकेश इति सम्बोधनद्वारा भगवान् जनान् वक्तुम् इच्छति यत् 'जनाः गुडाकेशाः भवितुं यत्नं कुर्वन्ति चेत् एव मम ऐश्वरं रूपं द्रष्टुं योग्याः भवन्ति' इति । अस्मिन् एव क्रमे सञ्जयः धृतराष्ट्रं वदति – **'एवम् उक्त्वा ततो राजन्'**[10] इति । अत्र सञ्जयः धृतराष्ट्रे सामान्यराजत्वं पश्यति । अतः हे राजन्, इति सम्बोधनं करोति । परन्तु भगवतः कृते महायोगेश्वरः इति पदं प्रायुङ्क्त ।

अग्रिमे श्लोके अर्जुनः वदति – **'पश्यामि देवांस्तव देव देहे'**[11] इति । दीव्यति यत् क्रीडति सर्गादिति, असुरान् विजिगीषते, सर्व्वभूतेषु व्यवहरति, आत्मतया द्योतते, स्तुत्यैः स्तूयते सर्व्वत्र गच्छति इति तस्माद्देवः । "देवशब्दः दान-दीपन-द्योतनानाम् अन्यतमम् अर्थम् आचष्टे। यज्ञस्य दाता दीपयिता द्योतयिता यमग्निरित्युक्तं भवति ।" इति तद्भाष्ये सायनः वदति ॥[12] अर्जुनः दिव्यप्रकाशकारणात् अत्र देव इति सम्बोधनं करोति । यतः सः सर्वान् देवान्, अन्यान् एकत्र स्थितान् विविधान् जीवान्, कमलासनस्थं ब्रह्माणं, शिवं, सर्वान् ऋषीन्, दिव्यान् सर्पान् च श्रीकृष्णे पश्यति ।

अग्रिमस्य श्लोकस्य पादांशे अर्जुनः वदति – **'पश्यामि विश्वेश्वर विश्वरूप'**[13] इति । विश्वस्य ईश्वरः विश्वेश्वरः, तत्सम्बुद्धौ हे विश्वेश्वर इति । विश्वम् एव रूपं यस्य सः विश्वरूपः, तत्सम्बुद्धौ हे विश्वरूप इति । एतस्य सम्बोधनस्य तात्पर्यम् अस्ति यत् अर्जुनः यत्र यत्र यं यं पश्यति तत्र तत्र सर्वत्र भगवन्तम् एव पश्यन् अस्ति इति । विश्वस्य स्वामी भवान् एव अस्ति सर्वत्र उपस्थितत्वात् । सांसारिकमनुष्याणां शरीराणि तु जडानि (अचेतनानि) शरीरी तु चेतनः भवति । परन्तु भगवतः श्रीकृष्णस्य एवंप्रकारेण विभागद्वयं नास्ति । विराड्रूपे शरीरी शरीरं च केवलं भवान् एव अस्ति । अतः विराड्रूपे सर्वं चिन्मयम् एव अस्ति । तात्पर्यम् एवम् अस्ति यत् अर्जुनः विश्वरूप इति सम्बोधनम् उपयुज्य कथयन् अस्ति यत् भवान् एव शरीरम् अस्ति । पुनश्च विश्वरूप इति कथयन् सः भवान् एव शरीरी अस्ति इति वक्तुम् इच्छति ।

अधुना अग्रिमं सम्बोधनान्तं पदं परिशीलयाम । **'लोकत्रयं प्रव्यथितं महात्मन्'**[14] इति । महान् आत्मा यस्य सः महात्मा, तत्सम्बुद्धौ हे महात्मन् इति । एतेन सम्बोधनेन अर्जुनः वक्तुम् इच्छति यत् भवतः स्वरूपम् इव न कस्यचिदपि स्वरूपम् अस्ति, न आसीत्, न च भविष्यति, अतः भवान् महात्मा अस्ति इति। अग्रिमे श्लोके प्रयुक्तं सम्बोधनान्तं पदं परिशीलयाम **'महाबाहो बहुबाहूरुपादम्'**[15] इति । महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ हे महाबाहो इति । यदा कश्चन भीतः भवति तदा तस्य रक्षणाय बाह्वोः आवश्यकता भवति । अतः अर्जुनः अत्र महाबाहो इति सम्बोधनं करोति । अस्मिन् एव क्रमे अग्रिमे श्लोके प्रयुक्तं सम्बोधनं परिशीलयाम, **'धृतिं न विन्दामि शमं च विष्णो'**[16] इति । *यस्मात् विश्वमिदं सर्वं तस्य शक्त्या महात्मनः । तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनात्* ॥ इत्युक्तेः विश--प्रवेशे 'नु'इति प्रत्ययः पृषोदरादित्वात् । हे कृष्ण ! भवान् साक्षात् विष्णुः अस्ति । यश्च भवद्रूपेण अवतारं गृहीतवान् अस्ति इति अर्जुनस्य अभिमतम् ।

---

[9] श्रीमद्.गीता – 11.07
[10] श्रीमद्.गीता – 11.09
[11] श्रीमद्.गीता – 11.15
[12] शब्दकल्पद्रुमः, देवः इति अन्वेषणीयम्
[13] श्रीमद्.गीता – 11.16
[14] श्रीमद्.गीता – 11.20
[15] श्रीमद्.गीता – 11.23
[16] श्रीमद्.गीता – 11.24

अधुना अग्रिमं सम्बोधनपदं परिशीलयाम, **'प्रसीद देवेश जगन्निवास'**[17] इति। अस्मिन् श्लोकांशे सम्बोधनद्वयम् अस्ति देवेश जगन्निवास च इति । देवानाम् ईशः देवेशः, तत्सम्बुद्धौ हे देवेश इति। जगतः निवासः जगन्निवासः, तत्सम्बुद्धौ हे जगन्निवास इति । अत्र अर्जुनः देवेश इति कथनेन वक्तुम् इच्छति यत् अयि श्रीकृष्ण! न भवान् सामान्यः देवः अपि तु देवेशः अस्ति इति अहम् अधुना ज्ञातवान् अस्मि । परन्तु अधुना अहं अतिभीतः अस्मि । अधुना भवान् प्रसन्नः भवतु मां रक्षतु च देवेशत्वात् । न केवलं देवेशः अपि तु भवान् जगन्निवासः अपि । परन्तु एतत् रूपं दृष्ट्वा जगति नैकोऽपि जनः अवशिष्येत । अतः कृपया प्रसन्नः भवतु इति । वास्तविकं भगवान् न अप्रसन्नः, अपि तु प्रसन्नः सन् एव एतत् रूपं दर्शयन् अस्ति । अस्मिन् विषये अस्य एव अध्यायस्य सप्तचत्वारिंशत्तमः श्लोकः द्रष्टव्यः –

**मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ।**
**तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥**[18]

अर्जुनः त्रिंशे श्लोके **'भासस्तवोग्राः प्रतपन्ति विष्णो'**[19] इति अत्र विष्णो इति सम्बोधयति । अस्मिन् एव क्रमे अग्रिमे श्लोके सः **'नमोऽस्तु ते देववर प्रसीद'**[20] इति वदति । अस्मिन् श्लोकांशे देववर इति पदं सम्बोधने अस्ति । देवानां वरः देववरः, तत्सम्बुद्धौ हे देववर इति । अर्जुनः अत्र अत्यन्तं भीतः अस्ति । परन्तु किमपि कर्तुं न शक्नोति । अतः सः हे देववरः भवान् कः इति अहं नावगच्छन् अस्मि । हे देवश्रेष्ठ, तुभ्यं नमः, त्वं प्रसन्नः भव इति प्रार्थयते । अग्रे भगवान् कथयति **'निमित्तमात्रं भव सव्यसाचिन्'**[21] इति । सव्येन वामेन हस्तेनापि सचति सन्दधाति बाणमिति, सच सन्धाने +णिनिः, सव्यसाची, तत्सम्बुद्धौ हे सव्यसाचिन् इति । उभौ मे दक्षिणौ पाणी गाण्डीवस्य विकर्षणे । तेन देवमनुष्येषु सव्यसाचीति मां विदुः ॥[22] अत्र भगवतः कथनस्य तात्पर्यम् अस्ति यत् यद्यपि मया एते पूर्वमेव मारिताः तथापि अप्रमादतया तन्नाम पूर्णशक्त्या भवान् युद्धे प्रवृत्तो भवतु, हस्तद्वयेन अपि बाणान् संदधातु इति ।

अस्मिन् एव क्रमे अधुना षट्त्रिंशस्य श्लोकस्य श्लोकांशं परिशीलयाम, स्थाने **'हृषीकेश तव प्रकीर्त्या'** इति । हृषीकाणाम् इन्द्रियाणाम् ईशः हृषीकेशः, तत्सम्बुद्धौ हे हृषीकेश इति । अत्र हृषीकेश इति कथनस्य तात्पर्यम् अस्ति यत् भवान् सर्वेषां हृदये विराजमानः सन् इन्द्रिय-अन्तःकरणादिभ्यः सत्तां स्फूर्तिं च प्रयच्छति । मह्यमपि प्रयच्छतु । अहं कष्टे पतितः अस्मि । अधुना अग्रिमं श्लोकं परिशीलयाम,

**कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।**
**अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥**[23]

एतस्मिन् श्लोके प्रयुक्तानि सम्बोधनपदानि – महात्मन्, अनन्त, देवेश जगन्निवास च इति । एतेषु त्रयाणां विवरणं पूर्वमेव कृतम् अस्ति । अधुना अनन्त इति सम्बोधनपदस्य विवरणं परिशीलयाम । अविद्यामानः अन्तः यस्य सः अनन्तः, तत्सम्बुद्धौ हे अनन्त इति । अनन्त – हे कृष्ण भवन्तं देश-दृष्ट्या काल-दृष्ट्या वस्तु-दृष्ट्या व्यक्ति-दृष्ट्या यया कयापि दृष्ट्या पश्यामः चेदपि भवतः अन्तः तु न दृश्यते । देशदृष्ट्या- भवतः आरम्भः कुतः, समाप्तिः कुत्र इति वक्तुम् एव न शक्यते । कालदृष्ट्या– भवान् कदा

[17] श्रीमद्.गीता – 11.25
[18] श्रीमद्.गीता, 11.47
[19] श्रीमद्.गीता – 11.30
[20] श्रीमद्.गीता – 11.31
[21] श्रीमद्.गीता – 11.33
[22] महाभारतम् – 4/12/19, (शब्दकल्पद्रुमः)
[23] श्रीमद्.गीता – 11.37

आरभ्य अस्ति ? कदा पर्यन्तं भविष्यति इत्यपि कोऽपि वक्तुं न शक्नोति । अत्र अत्यन्तं भीतः सन् अर्जुनः पुनः पुनः नामानि परिवर्तयन् नमस्कुर्वन् अस्ति ।

अधुना अग्रिमं श्लोकांशं परिशीलयाम, **'त्वया ततं विश्वमनन्तरूप'**[24] इति । अत्र सम्बोधनान्तं पदम् अस्ति अनन्तरूप इति । अविद्यामानः अन्तः यस्य सः अनन्तः, अनन्तानि रूपाणि यस्य सः अनन्तरूपः, तत्सम्बुद्धौ हे अनन्तरूप इति । अर्जुनः यत्र यत्र पश्यति तत्र सर्वत्र श्रीकृष्णस्य भिन्नं रूपम् एव पश्यति । अतः अनन्तरूप इति सम्बोधनं करोति । अधुना अग्रे पश्याम,

**नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।**
**अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ।।**[25]

अस्मिन् श्लोके सम्बोधनान्तं पदद्वयम् अस्ति – सर्व अनन्तवीर्य च इति । अत्र सर्व इति यत् सम्बोधनम् अस्ति तेन ज्ञायते यत् अर्जुनः अत्यन्तं भीतः अस्ति । अतः सः हे सर्व, आसर्वदिग्भ्यः तुभ्यं नमः इति वदिति । अनन्तवीर्य – अनन्तम् असीमं वीर्य्यं तेजो यस्य सः अनन्तवीर्य्यः, तत्सम्बुद्धौ अनन्तवीर्य इति । एतेन सम्बोधनेन अर्जुनः वक्तुम् इच्छति यत् भवान् तेजसा बलादिभिः अपि अनन्तः एव इति । अतः एव अर्जुनः अनन्तवीर्य इति सम्बोधनं कृतवान् । इतः अग्रे अन्येषां सम्बोधनपदानां केवलं दर्शनं करिष्यामः ।

एकचत्वारिंशे श्लोके प्रयुक्तानि सम्बोधनपदानि **'सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति'**[26] इति एतस्मिन् श्लोकांशे हे कृष्ण, हे यादव, हे सखा इति सम्बोधनान्तानि पदानि सन्ति । महर्षिपाणिनेः अनुगुणं हे सखे इति सम्बोधनान्तेन पदेन भवितव्यम् आसीत् । परन्तु अत्र हे सखा इति प्रयुक्तम् । द्विचत्वारिंशे प्रयुक्तं सम्बोधनपदं परिशीलयामः **'एकोऽथवाप्यच्युत तत्समक्षम्'**[27] इति । अस्मिन् श्लोकांशे **अच्युत** इति सम्बोधनवाचकं पदम् । अग्रिमं श्लोकांशं परिशीलयामः **'लोकत्रयेऽप्यप्रतिमप्रभाव'**[28] अस्मिन् श्लोकांशे **अप्रतिमप्रभाव** इति सम्बोधनान्तं पदम् अस्ति । चतुश्चत्वारिंशे श्लोके प्रयुक्तं सम्बोधनान्तं पदं परिशीलयामः **'प्रियः प्रियायार्हसि देव सोढुम्'**[29] इति । अस्मिन् श्लोकांशे **देव** इति सम्बोधनान्तं पदम् अस्ति ।

अधुना अग्रिमं सम्बोधनपदयुक्तं श्लोकांशं परिशीलयामः **'तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास'**[30] अस्मिन् श्लोकांशे देव *देवेश जगन्निवास* इति त्रीणि सम्बोधनपदानि सन्ति । (गीताप्रेसगोरखपुरतः प्रकाशिते चतुस्त्रिंशसंस्करणस्य शाङ्करभाष्ये 'देव रूपं' इति लिखितम् अस्ति । परन्तु ततः एव प्रकाशितायां साधकसञ्जीवन्याः षडशीतितमे संस्करणे 'देवरूपं' इति लिखितम् अस्ति । तन्नाम तत्पुरुषसमासः कृतः अस्ति । देवस्य रूपं देवरूपम् इति । राष्ट्रियसंस्कृतसंस्थानम् (केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली) इत्यतः आङ्ग्लसंवत्सरानुगुणं 2021 तमे वर्षे प्रकाशिते टीकाद्वयोपेते श्रीमद्भगवद्गीतायाः अभिनवसंस्करणे तु 'देवं रूपं' इति मूले लिखितम् अस्ति । एतस्य पृष्ठसंख्या अस्ति ६५५ इति । अतः अत्र देव देवरूपम् देवं रूपम् इति त्रिविधं रूपं प्राप्तम् । किं साधुतमम् इति विषये तु शोधस्य आवश्यकता टीकासु तु '**देव रूपम्**' इति आधिक्येन दृश्यते ।)

अधुना अग्रिमं श्लोकांशं परिशीलयामः, **'सहस्रबाहो भव विश्वमूर्ते'**[31] इति एतस्मिन् श्लोकांशे सहस्रबाहो विश्वमूर्ते च इति पदद्वयं सम्बोधनान्तम् अस्ति । सप्तचत्वारिंशे श्लोके प्रयुक्तं सम्बोधनान्तं पदं परिशीलयामः **'मया प्रसन्नेन तवार्जुनेदम्'**[32]

[24] श्रीमद्.गीता – 11.38
[25] श्रीमद्.गीता – 11.40
[26] श्रीमद्.गीता – 11.41
[27] श्रीमद्.गीता – 11.42
[28] श्रीमद्.गीता – 11.43
[29] श्रीमद्.गीता – 11.44
[30] श्रीमद्.गीता – 11.45
[31] श्रीमद्.गीता – 11.46

अत्र **अर्जुन** इति सम्बोधनान्तं पदम् अस्ति । अग्रिमं सम्बोधनं परिशीलयामः **'द्रष्टुं त्वदन्येन कुरुप्रवीर'**[33] अस्मिन् श्लोके **कुरुप्रवीर** इति सम्बोधनान्तं पदम् अस्ति । अधुना अग्रिमं सम्बोधनान्तं पदं परिशीलयामः **'तव सौम्यं जनार्दन'** इति । अत्र **जनार्दन** इति सम्बोधनान्तं पदम् अस्ति। अस्य अध्यायस्य उपान्तिमं श्लोकं परिशीलयामः **'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ।।'**[34] अस्मिन् श्लोके सम्बोधनपदद्वयम् अस्ति- **अर्जुन परन्तप** च इति ॥ अधुना अस्य अध्यायस्य अन्तिमे श्लोके प्रयुक्तम् अन्तिमं सम्बोधनान्तं पदं पश्यामः **'यः स मामेति पाण्डव'**[35] अस्मिन् श्लोकांशे **पाण्डव** इति सम्बोधनान्तं पदम् अस्ति।

## सन्दर्भग्रन्थसूची


1. **श्रीमद्भगवद्गीता**,गीताप्रेस-गोरखपुरम्, संवत् 2065
2. **श्रीमद्भगवद्गीता**, शाङ्करभाष्यम्, गीताप्रेस-गोरखपुरम्, संवत् 2072
3. **श्रीमद्भगवद्गीता**, साधकसञ्जीवनी, गीताप्रेस-गोरखपुरम्, संवत् 2072
4. **गीतायाभाषा** (4.3), संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली 2017
5. श्री श्रीमद् ए.सी. भक्तिवेदान्त स्वामी प्रभुपाद, **श्रीमद्भगवद्गीता यथारूप,** रेखा प्रिन्टर्स प्रा. लि. द्वारा मुद्रित 2006
6. **श्रीमद्भगवद्गीता**, गूढार्थदीपिकोपेता सुबोधिनीटीकोपेता च, आनन्दाश्रममुद्रणालयः, ख्रिस्ताब्दः 1901
7. **श्रीमद्भगवद्गीता**, तात्पर्यचन्द्रिकाटीकोपेता रामानुजाचार्यविरचितभाष्योपेता च, आनन्दाश्रममुद्रणालयः ख्रिस्ताब्दः 1923


## तन्त्रांशः

1. शब्दकल्पद्रुमः एप (मदनमोहन झा)
2. वाचस्पत्यम् एप (मदनमोहन झा)
3. अमरकोषः एप (मदनमोहन झा)

[32] श्रीमद्.गीता – 11.47
[33] श्रीमद्.गीता – 11.48
[34] श्रीमद्.गीता – 11.54
[35] श्रीमद्.गीता – 11.55